आम एकान्तरमामन्त्रितं यत् तस्य एकश्रुतेरनुदात्तस्य च प्रतिषेध इष्यते (म. भा. ३. ३७७)। तदुभयमनेन क्रियते इति केचिदाहुः। प्लुतोदात्तः पुनरसिद्धत्वान् न प्रतिषिध्यते। अपरेषां दर्शनम्, अनन्तिके इत्यनेन यन् न दूरं न सन्निकृष्टं तत् परिगृह्यते, तेन अस्मिन्नेकश्रुतेः प्राप्तिरेव[1] नास्ति, [2]प्लुतोदात्तोऽपि नोदाहर्तव्यः इति ॥

## यद्धितुपरं छन्दसि। (५६/३९६३)

आमन्त्रितम् इत्येतदस्वरितत्वान् नानुवर्तते। तिङ इति वर्तते एव। यत्परं, हिपरं, तुपरं च तिङन्तं छन्दसि नानुदात्तं भवति। यत्परं तावत् – 'गवां गोत्रमुदसृजो यदङ्गिरः' (ऋ. २.२३.१८)। हिपरम् – 'इन्दवो वामुशन्ति हि' (तै. सं. १.४.४.१) तुपरम् – आख्यास्यामि तु ते। निपातैर्यद्यदिहन्त (८.१.३०/३९३७) इति, 'हि च' (८.१.३४/३९४१) इति, तुपश्यपश्यताहैः (८.१.३९/३९४६) इति च निघातप्रतिषेधे सिद्धे वचनमिदं नियमार्थम्, [3]एभिरेव परैर्योगे प्रतिषेधो भवति, नान्यैः इति। इह न भवति, [4]जाये स्वो रोहावेहि। एहि इत्यनेन गत्यर्थलोटा युक्तस्य रोहाव इत्यस्य लोडन्तस्य निघातो भवत्येव ॥

## चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः। (५७/३९६४)

चन चिद् इव गोत्रादि तद्धित आम्रेडित इत्येतेषु परतः अगतेः उत्तरं तिङन्तं नानुदात्तं भवति। चन–देवदत्तः पचति चन। चित् – देवदत्तः पचति चित्। इव–देवदत्तः पचतीव। गोत्रादि – देवदत्तः पचति गोत्रम्। देवदत्तः पचति ब्रुवम्। देवदत्तः पचति प्रवचनम्। इहापि गोत्रादयः कुत्सनाभीक्ष्ण्ययोः एव गृह्यन्ते। तद्धित – देवदत्तः पचतिकल्पम्। देवदत्तः पचतिरूपम्। अनुदात्तः तद्धित इह उदाहरणम्, अन्यत्र तद्धितस्वरेण[5] तिङ्स्वरो बाध्यते, पचतिदेश्यः[6]। आम्रेडित – देवदत्तः पचति पचति। अगतेः इति किम्? देवदत्तः प्रपचति चन। अत्र [7]अगतिग्रहणे, सगतिरपि तिङ् इत्यत्र च उपसर्गग्रहणं द्रष्टव्यम्। इह मा भूत्, शुक्लीकरोति चन। यत् काष्ठं शुक्लीकरोति। यत् काष्ठं कृष्णीकरोति[8] ॥

## चादिषु च। (५८/३९६५)

चादिषु च परतः तिङन्तमगतेः परं नानुदात्तं भवति। चादयः 'न चवाहाहैवयुक्ते' (८.१.२४/४०८) [9]इत्यत्र ये निर्दिष्टाः, ते [10]इह परिगृह्यन्ते। चशब्दे तावत् – देवदत्तः पचति च खादति च। वा – देवदत्तः पचति वा खादति वा। ह – देवदत्तः पचति ह खादति ह। अह – देवदत्तः पचत्यह खादत्यह। एव – देवदत्तः पचत्येव खादत्येव। अगतेरित्येव, देवदत्तः प्रपचति च प्रखादति च। प्रथमस्यात्र तिङन्तस्य 'चवायोगे प्रथमा' (८.१.५९) इति निघातः प्रतिषिध्यते एव, परं तु निहन्यते[11] ॥

---

एव नास्ति ड. 2. प्लुतोऽपि ड. 3. एतैरेव ड. 4. जाय एहि सुवो रोहाव रोहाव (तै.सं. 1.7.9.1) क. 5. देश्यस्वरो क. 6. देवदत्तः इत्यधिकम् क. 7. अगतिग्रहणेन ब. ड, गतिग्रहणेन ड. 8. चित् इत्यधिकम् ब, चन इत्यधिकम् क. ड. ह. 9. इत्यस्मिन् सूत्रे ब. क. ह. 10. एव ड. 11. एव इत्यधिकम् क.